# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| **कक्षा-शास्त्री-३** | **प्रश्नपत्रम् – ६** | **गुणाः – ७०** |
| **विषयः – धर्मशास्त्रम्** | **सत्रम्- ६ (षष्ठम्)** | **समयः- ०८:०० तः ११:००** |
| **दिनाङ्कः – ०१/०४/२०२०** | **सन्दर्भग्रन्थः – मनुस्मृतिः (अध्यायाः – ११-१२)** | |

---

### प्रथमान्वितिः (Unit 1)

गुणाः

**प्रश्नः १ अधोलिखितयोः द्वयोः व्याख्या कार्या** १०

१ यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति।
स याति भासतां विप्रः काकतां वा शतं समाः।।

२ अनृतं च समुत्कर्षे राजगामि च पैशुनम्।
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया।।

३ न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेतकर्हि चित्।
यजमानो हि भिक्षित्वा चण्डालः प्रेत्य जायते।।

**प्रश्नः २ द्वयोः कमप्येकम् उत्तरयत।** १०

१ भक्ष्याभक्ष्यप्रायश्चितं ग्रन्थानुगुणं विविच्यताम्।

२ मनुस्मृतौ धर्मदर्शनं विषयमिमं सविस्तरं लिखत।

### द्वितीयान्वितिः (Unit 2)

**प्रश्नः ३ द्वयोः ससन्दर्भ भावार्थो लेख्यः।** १०

१ अज्ञानाद्यदि वा ज्ञानात्कृत्वा कर्म विगर्हितम्।
तस्माद्विमुक्तिमन्विच्छन् द्वितीयं न समाचरेत्।।

२ यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम्।
तस्योत्सर्गेण शुद्यन्ति जप्येन तपसैव च ।।

३ यत्तुस्यात् मोहसंयुक्तं अव्यकतं प्रिषधात्मकम्
अप्रतर्कयभविज्ञेयं तमस्तदुयधारयेत्।।

**प्रश्नः ४ कस्यापि एकस्य उत्तरं सविस्तरं लिखत।** १०

१ श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः यथाग्रन्थं विस्तृतं लिखत।

२ भगवान्मनुः मनुस्मृतिश्च सिवस्तरं निरूपणं क्रियताम्।

## तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ द्वयोः ससन्दर्भ विशेषार्थं विलिख्यत।** १०

१ शुभाशुभफलं कर्म मनोवाग्देहसम्भवम्।
कर्मजा गतयो नृणामुत्तमाधममध्यमाः।।

२ यादृशेन तु भावेन यद्यत्कर्म निषेवते।
तादृशेन शरीरेण तत्तफलमुपाश्नुते।।

३ यथा जातबलोवह्निर्दहत्यार्द्रानपि द्रुमात्।
तया दहति वेदज्ञः कर्मणं दोषामात्मनः।।

**प्रश्नः ६ कस्यापि एकस्य उत्तरं सविस्तारं लिखत।** १०

१ गुणानां प्रभावः यथाग्रन्थं विविच्यताम्।

२ द्वादशाध्यायस्य सारांशो लेख्यः।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ केषाञ्चन दशानाम् उत्तराणि लेख्यानि।** १०

१ मनुस्मृतौ कति अध्यायाः सन्ति?

२ मनुस्मृतिः नाम किम्?

३ मनुसमृतिः कस्य शास्त्रस्य ग्रन्थः अस्ति?

४ भृणहत्यायाः पापात् मुक्तिः कथं भवति?

५ सुरापानसमानानि पापानि कानि सन्ति?

६ स्नातकाः कतिविद्याः विद्यन्ते?

७ एकादशाध्याये कति श्लोकाः सन्ति?

८ परमात्मनः शरीरात् के समुत्पद्यन्ते?

९ चर्मरोगी कः भवति?

१० सङ्कल्पः केन क्रियते?

११ प्रकृतेः कति च के गुणाः सन्ति?

१२ धर्मभ्रष्टब्राह्मणः प्रेतो भूत्वा किं खादति?

१३ द्वादशाध्याये कति श्लोकाः सन्ति?

१४ भृगुऋषेः पितुः नाम किम्?

१५ किम् नाम परिषद्?

*************************